শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রীসুদর্শনাষ্টোত্তরশতনামস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

# ॥শ্রীসুদর্শনাষ্টোত্তরশতনামস্তোত্রম্ ॥

সুদর্শনশ্চক্ররাজঃ তেজোৱ্যূহো মহাদ্যুতিঃ।
সহস্রবাহুর্দীপ্তাঙ্গঃ অরুণাক্ষঃ প্রতাপৱান্॥ ১॥

অনেকাদিত্যসঙ্কাশঃ প্রোদ্যজ্জ্বালাভিরঞ্জিতঃ।
সৌদামিনীসহস্রাভো মণিকুণ্ডলশোভিতঃ॥ ২॥

পঞ্চভূতমনোরূপো ষট্কোণান্তরসংস্থিতঃ।
হরান্তঃ করণোদ্ভূতরোষভীষণৱিগ্রহঃ॥ ৩॥

হরিপাণিলসতপদ্মৱিহারারমনোহরঃ।
শ্রাকাররূপসসর্ৱজ্ঞঃ সর্ৱলোকার্চিতপ্রভুঃ॥ ৪॥

চতুর্দশসহস্রারঃ চতুর্ৱেদমযোনলঃ।
ভক্তচান্দ্রমসজ্যোতিঃ ভৱরোগৱিনাশনঃ॥ ৫॥

রেফাত্মকো মকারশ্চ রক্ষোসৃগ্রূষিতাঙ্গকঃ।
সর্ৱদৈত্যগ্রীৱনালৱিভেদনমহাগজঃ॥ ৬॥

ভীমদংষ্ট্রোজ্জ্বলাকারো ভীমকর্মা ত্রিলোচনঃ।
নীলৱর্ত্মা নিত্যসুখো নির্মলশ্রীর্নিরঞ্জনঃ॥ ৭॥

রক্তমাল্যাম্বরধরো রক্তচন্দনরূষিতঃ।
রজোগুণাকৃতিশ্শূরো রক্ষঃকুলযমোপমঃ॥ ৮॥

নিত্যক্ষেমকরঃ প্রাজ্ঞঃ পাষণ্ডজনখণ্ডনঃ।
নারাযণাজ্ঞানুৱর্তী নৈগমান্তঃপ্রকাশকঃ॥ ৯॥

বলিনন্দনদোর্দণ্ডখণ্ডনো ৱিজযাকৃতিঃ।
মিত্রভাৱী সর্ৱমযো তমোৱিধ্ৱংসকস্তথা॥ ১০॥

রজস্সত্ত্বতমোদ্ৱর্তী ত্রিগুণাত্মা ত্রিলোকধৃত্।
হরিমাযাগুণোপেতঃ অৱ্যযোক্ষস্ৱরূপভাক্॥ ১১॥

www.prapatti.com

পৰমাত্মা পৰং জ্যোতিঃ পঞ্চকৃত্যপৰাযণঃ।
জ্ঞানশক্তিবলৈশ্বৰ্যৰীৰ্যতেজঃপ্ৰভামযঃ॥ ১২ ॥

সদসতপৰমঃ পূৰ্ণো ৰাঙ্মযো ৰৰদোচ্যুতঃ।
জীৰো গুৰুৰ্হংসৰূপঃ পঞ্চাশতপীঠৰূপকঃ॥ ১৩ ॥

মাতৃকামণ্ডলাধ্যক্ষো মধুধ্ৰংসী মনোমযঃ।
বুদ্ধিৰূপশ্চিত্তসাক্ষী সাৰো হংসাক্ষৰদ্ৱযঃ॥ ১৪ ॥

মন্ত্ৰযন্ত্ৰপ্ৰভাৰজ্ঞো মন্ত্ৰযন্ত্ৰমযো ৰিভুঃ।
স্ৰষ্টা ক্ৰিযাস্পদশশুদ্ধঃ আধাৰশ্চক্ৰৰূপকঃ॥ ১৫ ॥

নিৰাযুধো হ্যসংৰম্ভঃ সৰ্ৰাযুধসমন্ৱিতঃ।
ওঙ্কাৰৰূপী পূৰ্ণাত্মা আঙ্কাৰসসাধ্যবন্ধনঃ॥ ১৬ ॥

ঐঙ্কাৰো ৰাকপ্ৰদো ৰাগ্মী শ্ৰীঙ্কাৰৈশ্বৰ্যৰৰ্ধনঃ।
ক্লীঙ্কাৰমোহনাকাৰো হুংফটক্ষোভণাকৃতিঃ॥ ১৭ ॥

ইন্দ্ৰাৰ্চিতমনোৰেগো ধৰণীভাৰনাশকঃ।
ৰীৰাৰাধ্যো ৰিশ্বৰূপো ৰৈষ্ণৰো ৰিষ্ণুৰূপকঃ॥ ১৮ ॥

সত্যব্ৰতসসত্যপৰঃ সত্যধৰ্মানুষঙ্গকঃ।
নাৰাযণকৃপাৰ্যূহ তেজশ্চক্ৰসসুদৰ্শনঃ॥ ১৯ ॥

॥ ইতি শ্ৰীসুদৰ্শনাষ্টোত্তৰশতনামস্তোত্ৰং সংপূৰ্ণম্ ॥

www.prapatti.com